# Shri Radhikashtakam by shrikrishnadasakavi

# શ્રીરાધિકાષ્ટકમ્

## Document Information

Text title : rAdhikAShTakam by shrIkRRiShNadAsakavi

File name : rAdhikAShTakamshrIkRRiShNadAsakavi.itx

Category : devii, aShTaka, rAdhA, devI

Location : doc_devii

Author : Krishnadas

Proofread by : PSA Easwaran psawaswaran at gmail.com

Description/comments : Edited by S. V. Radhakrishna Shastriji

Acknowledge-Permission: Mahaperiaval Trust

Latest update : August 28, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

November 22, 2022

*sanskritdocuments.org*

# શ્રીરાધિકાષ્ટકમ્

શ્રીકૃષ્ણદાસકવિરાજવિરચિતમ્ ।
કુઙ્કુમાક્તકાઞ્ચનાબ્જ ગર્વહારિ ગૌરભા
પીતનાઞ્ચિતાબ્જગન્ધકીર્તિનિન્દસૌરભા ।
વલ્લવેશસૂનુ સર્વવાઞ્છિતાર્થસાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૧॥

કૌરવિન્દકાન્તનિન્દચિત્રપત્રશાટિકા
કૃષ્ણમત્તભૃઙ્ગકેલિ ફુલ્લપુષ્પવાટિકા ।
કૃષ્ણનિત્યસઙ્ગમાર્થપદ્મબન્ધુરાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૨॥

સૌકુમાર્યસૃષ્ટપલ્લવાલિકીર્તિનિગ્રહા
ચન્દ્રચન્દનોત્પલેન્દુસેવ્યશીતવિગ્રહા ।
સ્વાભિમર્શવલ્લવીશકામતાપબાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૩॥

વિશ્વવન્દ્યયૌવતાભિવન્દતાપિ યા રમા
રૂપનવ્યયૌવનાદિસમ્પદા ન યત્સમા ।
શીલહાર્દલીલયા ચ સા યતોઽસ્તિ નાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાસ્તુ રાધિકા ॥ ૪॥

રાસલાસ્યગીતનર્મસત્કલાલિપણ્ડિતા
પ્રેમરમ્યરૂપવેશસદ્ગુણાલિમણ્ડિતા ।
વિશ્વનવ્યગોપયોષિદાલિતોઽપિ યાઽધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૫॥

નિત્યનવ્યરૂપકેલિકૃષ્ણભાવસમ્પદા
કૃષ્ણરાગબન્ધગોપયૌવતેષુ કમ્પદા ।
કૃષ્ણરૂપવેશકેલિલગ્નસત્સમાધિકા

મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૬॥

સ્વેદકમ્પકણ્ટકાશ્રુગદ્ગદાદિસઞ્ચિતા
મર્ષહર્ષવામતાદિ ભાવભૂષણાઞ્ચિતા ।
કૃષ્ણનેત્રતોષિરત્નમણ્ડનાલિદાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૭॥

યા ક્ષણાર્ધકૃષ્ણવિપ્રયોગસન્તતોદિતા-
નેકદૈન્યચાપલાદિભાવવૃન્દમોદિતા ।
યત્નલબ્ધકૃષ્ણસઙ્ગનિર્ગતાખિલાધિકા
મહ્યમાત્મપાદપદ્મદાસ્યદાઽસ્તુ રાધિકા ॥ ૮॥

અષ્ટકેન યસ્ત્વનેન નૌતિ કૃષ્ણવલ્લભાં
દર્શનેઽપિ શૈલજાદિયોષિદાલિદુર્લભામ્ ।
કૃષ્ણસઙ્ગનન્દતાત્મદાસ્યસીધુભાજનં
તં કરોતિ નન્દતાલિસઞ્ચયાશુ સા જનમ્ ॥ ૯॥

ઇતિ શ્રીકૃષ્ણદાસકવિરાજવિરચિતં શ્રીરાધિકાષ્ટકં સમ્પૂર્ણમ્ ।

Proofread by PSA Easwaran

*Shri Radhikashtakam by shrikrishnadasakavi*

pdf was typeset on November 22, 2022

Please send corrections to *sanskrit@cheerful.com*